# shrI gAyatrI suprabhAtam

# શ્રીગાયત્રી સુપ્રભાતમ્

## Document Information

Text title : gAyatrI suprabhAtam

File name : gAyatrIsuprabhAtaM.itx

Category : suprabhAta, devii, gAyatrI, devI

Location : doc_devii

Author : Shri Paturi Sitaramanjaneyulu

Transliterated by : MyP

Proofread by : Desiraju H. Rao

Latest update : June 9, 2004

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીગાયત્રી સુપ્રભાતમ્

શ્રી પાતૂરિ સીતારામાંજનેયુલુ કૃત
॥ શ્રીરસ્તુ ॥

શ્રી જાનિરદ્રિતનયાપતિરબ્જગર્ભઃ
સર્વે ચ દૈવતગણાઃ સમહર્ષયોઽમી ।
એતે ભૂતનિચયાઃ સમુદીરયન્તિ
ગાયત્રિ - લોકવિનુતે તવ સુપ્રભાતમ્ ॥ ૧॥

પુષ્પોચ્ચયપ્રવિલસત્કરકંજયુગ્મામ્
ગંગાદિદિવ્યતટિનીવરતીરદેશે- ।
ષ્વર્ઘ્યમ્ સમર્પયિતુમત્રજનાસ્તવૈતે
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૨॥

કર્ણેઽમૃતમ્ વિકિરતા સ્વરસંચયેન
સર્વે દ્વિજાઃ શ્રુતિગણમ્ સમુદીરયન્તિ ।
પશ્ચાશ્રમાસથ વૃક્ષતલેષુ દેવિ
ગાયતિ -લોકવિનુતે -તવ સુપ્રભાતમ્ ॥ ૪॥

ગાવો મહર્ષિનિચયાશ્રમ ભૂમિભાગાત્
ગન્તુમ્ વનાય શનકૈઃ શનકૈઃ પ્રયાન્તિ ।
વત્સાન્ પયોઽમૃતરસમ્ નનુ પાયયિત્યા
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૪॥

શિષ્ય પ્રબોધનપરા વર મૌનિ મુખ્યાઃ
વ્યાખ્યાન્તિ વેદગદિતમ્ સ્ફુટ ધર્મ તતત્ત્વમ્ ।
સ્વીયાશ્રમાઙ્ગણતલેષુ મનોહરેષુ
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૫॥

શ્રોત્રામૃતમ્ શ્રુતિરવમ્ કલયન્ત એતે

વિસ્મૃત્ય ગન્તુમટવીમ્ ફલલાભલોભાત્ ।
વૃક્ષાગ્ર ભૂમિષુ વનેષુ લસન્તિ કીરાઃ
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૬॥

મૂર્તિત્રયાત્મકલિતે નિગમ ત્રયેણ
વેદ્યે સ્વરત્રય પરિસ્ફુટ મન્તરૂપે
તત્ત્વપ્રબોધનપરોપનિષત્પ્રપઞ્ચે
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૭॥

વિશ્વાત્મિકે નિગમશીર્ષવતંસરૂપે
સર્વાગમાન્તરુદિતે વરતૈજસાત્મન્ ।
પ્રાજ્ઞાત્મિકે સૃજનપોષણસંહૃતિસ્થે
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૮॥

તુર્યાત્મિકે સકલતત્ત્વગણાનતીતે
આનન્દભોગકલિતે પરમાર્ધદત્રિ
બ્રહ્માનુભૂતિવરદે સતતમ્  જનાનામ્ ।
ગાયત્રિ - લોકવિનુતે -સુપ્રભાતમ્  ॥ ૯॥

તારસ્વરેણ મધુરમ્ પરિગીયમાને
મન્દ્રસ્વરેણ મધુરેણ ચ મધ્યમેન ।
ગાનાત્મિકે નિખિલલોક મનોજ્ઞ ભાવે
ગાયત્રિ - લોકવિનુતે - તવ સુપભાતમ્ ॥ ૧૦॥

પાપાટવી દહન જાગૃત માનસા ત્વમ્
ભક્તૌઘ પાલન નિરંતર દીક્ષિતાઽસિ ।
ત્વય્યેવ વિશ્વમખિલમ્ સ્થિરતામુપૈતિ
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૧૧॥

યા વૈદિકી નિખિલ પાવન પાવની વાક્
યા લૌકિકી વ્યવહૃતિ પ્રવણા જનાનામ્ ।
યા કાવ્યરૂપ કલિતા તવ રૂપ મેતાઃ
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૧૨॥

દિવ્યમ્  વિમાનમધિરુહ્ય નભોઙ્ગણેઽત્ર
ગાયન્તિ દિવ્ય મહિમાનમિમે ભવત્યાઃ ।
પશ્ય પ્રસીદ નિચયા દિવિજાઙ્ગનાનામ્

ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૧૩॥

હૈમીમ્ રુચમ્  સકલ ભૂમિરુહાગ્રદેશે-
ષ્વાધાય તત્કૃત પરોપકૃતૌ પ્રસન્નઃ ।
ભાનુઃ કરોત્યવસરે કનકાભિષેકમ્
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૧૪॥

દિવ્યાપગાસુ સરસીષુ વની નિકુઙ્જે-
ષૂચ્ચાવચાનિ કુસુમાનિ મનોહરાણિ ।
પુલ્લાનિ સન્તિ પરિતસ્તવ પૂજનાય
ગાયત્રિ -  લોકવિનુતે -  તવ સુપ્રભાતમ્ ॥ ૧૫॥

કુર્વન્તિ પક્ષિનિચયાઃ કલગાનમેતે
વૃક્ષાગ્રમુન્નતતરાસનમાશ્રયન્તઃ
દેવિ - ત્વદીય મહિમાનમુદીરયન્તો
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૧૬॥

વિશ્વેશિ - વિષ્ણુભગિનિ - શ્રુતિવાક્સ્વરૂપે -
તન્માત્રિકે - નિખિલમન્તમયસ્વરૂપે -
ગાનાત્મિકે - નિખિલતત્ત્વનિજસ્વરૂપે -
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૧૭॥

તેજોમયિ - ત્રિભુવનાવનસક્તચિત્તે -
સન્ધાત્મિકે - સકલ કાલ કલા સ્વરૂપે -
મૃત્યુંજયે - જયિનિ - નિત્યનિરંતરાત્મન્ -
ગાયત્રિ -  લોકવિનુતે -  તવ સુપ્રભાતમ્ ॥ ૧૮॥

ત્વામેવ દેવિ - પરિતો નિખિલાનિ તન્ત્રા-
ણ્યાભાતિ તત્ત્વમખિલમ્ ભવતીમ્ વિવૃણ્વત્ ।
ત્વમ્  સર્વદાઽસિ તરુણારુણદિવ્યદેહે -
ગાયત્રિ -  લોકવિનુતે -  તવ સુપ્રભાતમ્ ॥ ૧૯॥

નિત્યાઽસિ દેવિ - ભવતી નિખિલે પ્રપઞ્ચે
વન્દ્યાઽસિ સર્વ ભુવનૈઃ સતતોદ્યતાસિ ।
ધી પ્રેરિકાઽસિ ભુવનસ્ય ચરાચરસ્ય
ગાયત્રિ -  લોકવિનુતે -  તવ સુપ્રભાતમ્ ॥ ૨૦॥

વન્દામહે ભગવતીમ્ ભવતીમ્  ભવાબ્ધિ-
સન્તારિણીમ્ ત્રિકરણૈઃ કરુણામૃતાબ્દે-
સમ્પશ્ય ચિન્મયતનો - કરુણાર્દ્રદૃષ્ટ્યા
ગાયત્રિ -  લોકવિનુતે -  તવ સુપ્રભાતમ્  ॥  ૨૧ ॥

ત્વમ્ માતૃકામયતનુઃ પરમ પ્રભાવા
ત્વય્યેવ દેવિ - પરમઃ પુરુષઃ પુરાણઃ ।
ત્વત્તઃ સમસ્ત ભુવનાનિ સમુલ્લસન્તિ
ગાયત્રિ -  લોકવિનુતે -  તવ સુપ્રભાતમ્  ॥  ૨૨ ॥

ત્વમ્ વૈ પ્રસૂર્નિખિલદેવગણસ્ય દેવિ
ત્વમ્ સ્તૂયસે ત્રિષવણમ્ નિખિલૈશ્ચ લોકૈઃ ।
ત્વમ્ દેશ કાલ પરમાર્થ પરિસ્ફુટાસિ
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્  ॥  ૨૩ ॥

ત્વમ્ ગાધિસૂનુ પરમર્ષિ વરેણ દૃષ્ટા
તેજોમયી સવિતુરાત્મમયાખિલાર્થા ।
સર્વાર્થદા પ્રણત ભક્ત જનસ્ય શશ્વત્
ગાયત્રિ - લોકવિનુતો - તવ સુપ્રભાતમ્  ॥  ૨૪ ॥

સંકલ્પ્ય લોકમખિલમ્ મનસૈવ સૂષે
કારુણ્યભાવ કલિતાઽવસિ લોકમાતા ।
કોપાન્વિતા તમખિલમ્ કુરુષે પ્રલીનમ્
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્  ॥  ૨૫ ॥

મુક્તાભ વિદ્રુમ સુવર્ણ મહેન્દ્ર નીલ
શ્વેતપ્રભૈર્ ભુવન રક્ષણ બુદ્ધિ દીક્ષૈઃ ।
વક્ત્રૈર્યુતે - નિગમ માતરુદારસત્ત્વે
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્  ॥  ૨૬ ॥

કારુણ્ય વીચિ નિચયામલ કાન્તિ કાન્તામ્
બ્રહ્માદિ સર્વ દિવિજેડ્ય મહાપ્રભાવામ્ ।
પ્રીત્યા પ્રસારય દૃશમ્ મયિ લોકમાતઃ
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્  ॥  ૨૭ ॥

શ્રી લક્ષ્મણાદિ ગુરુ સત્કરુણૈકલબ્ધ-
વિદ્યા વિનીત મતિયાનય માઽનેયઃ ।

સંસેવતેઽત્રભવતીમ્ ભુવતીમ્ વચોભિઃ
ગાયત્રિ - લોકવિનુતે - તવ સુપ્રભાતમ્ ॥ ૨૮॥

ઇતિ સીતારામાઙ્જનેય કવિ કૃત ગાયત્રી સુપ્રભાતમ્ ॥

---

Shri Paturi SitarAmAnjaneyulu is a contemporary
poet both in Sanskrit and Telugu.
This septuagenarian is a resident of Hyderabad, AP. India.

---

*shrI gAyatrI suprabhAtam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*